नवरत्नम्

Vesion 0.1

हरिरामव्यासरचितम्

edited by
Neal Delmonico (Nitai Das)

September 28, 2001

Contents

Chapter 1

प्रथमरत्नम्

कृष्णं नौमि किशोरं राधादिभिरर्चितं प्रीत्या ।
सुलभं वृन्दावनविपिने निखिलेशं भक्तिलेशतो वश्यम् ॥ १ ॥

जयति श्रीमध्वरविर्यतः प्रकाशो बभूव भक्तिमयः ।
प्रविनाश किल तमसो मायावादादिदुर्वचसः ॥ २ ॥

वन्दे श्रीगोविन्दे धृताशयान्वैष्णवानहं शश्वत् ।
यत्कृपया हरिरामो व्यासस्तनवै स्वपद्धतिं सूक्ष्माम् ॥ ३ ॥

स्मर्तव्या सततं सद्भिः स्वीया गुरुपरम्परा ।
सिद्ध्यत्येकान्तिता नैषां सिद्धिहेतुर्यया विना ॥ ४ ॥

तदुक्तं पाद्मे —

> सम्प्रदायविहीना ये मन्त्रास्ते निष्फला मताः ।
> अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः ॥
> श्रीब्रह्मरुद्रसनका वैष्णवाः क्षितिपावनाः ।
> चत्वारस्ते कलौ भाव्या ह्युत्कले पुरुषोत्तमात् ॥
> रामानुजं श्रीः स्वीचक्रे मध्वाचार्यं चतुर्मुखः ।
> श्रीविष्णुस्वामिनं रुद्रो निम्बादित्यं चतुःसनः ॥

निजा सा यथा —

श्रीकृष्णो भगवान् ब्रह्मा नारदो बादरायणः ।
श्रीमध्वः पद्मनाभश्च नृहरिर्माधवश्च सः ॥ ५ ॥
अक्षोभ्यो जयतीर्थश्च ज्ञानसिन्धुर्दयानिधिः ।
विद्यानिधिश्च राजेन्द्रो जयधर्ममुनिस्ततः ॥ ६ ॥
पुरुषोत्तमो ब्रह्मण्यो व्यासतीर्थश्च तस्य हि ।
लक्ष्मीपतिस्ततः श्रीमान्माधवेन्द्रयतीश्वरः ॥ ७ ॥
ईश्वरस्तस्य माधवो राधाकृष्णप्रियोऽभवत् ।
तस्याहं करुणापात्रं हरिरामाभिधोऽभवमिति ॥ ८ ॥
इतिश्रीगुरुप्रणालिकोद्देशः
यान्यार्यो नवरत्नानि प्रमेयाण्यह सः प्रभुः ।
श्रीमध्वस्तत्त्ववादीन्द्रस्तानि मे सम्मतानि हि ॥ ९ ॥

तानि यथा —

> हरिः परतमः सत्यं जगद्भेदस्तु तात्त्विकः ।
> जीवाः श्रीविष्णुदासास्तत्तारतम्यं परस्परं ॥
> मुक्तिर्हरिपदप्राप्तिस्तद्धेतुर्भक्तिरुत्तमा ।
> प्रत्यक्षादित्रयं मानं वेदवेद्यस्तु माधवः ॥ इति ॥ (क)

तत्र हरेः परमत्वं —

तथाहि श्वेतास्वतराः पठन्ति (श्वे. उ., ६.७) —

> तमीश्वराणां परमं महेश्वरं तद्दैवतानां परमं च दैवतं ।
> पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् ॥ (ख)

आह च भगवान् स्वयं (भ. गी., ७.७) —

> मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जयेति ॥ (ग) ॥

सहेतुः सच्चिदानन्दो ज्ञानादिगुणवान् विभुः ।
राधादिशक्तिको नित्यधामलीलोऽस्त्यतस्तथा ।

तत्र तस्य हेतुत्वं श्वेताश्वतरे (श्वे. उ., ६.९)

स कारणम् करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः ॥ (घ) ॥

स्मृतिश्च (ब्रह्. सं., ५.१) —

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणम् ॥ इति (ङ) ॥

आनन्दो ब्रह्मेति व्यजानात् ॥ इति च (तैत्. उ., ३.६) (च) ॥

आथर्वणिकश्च (घोप्. ताप्. उ., पूर्व) —

तमेकं गोविन्दं सच्चिदानन्दविग्रहं ॥ इति (छ) ॥

चिदानन्दस्य मूर्तत्वं रागवत् प्रतिभाति तत् ।
विपक्षे कोपमधेति श्रुतिरित्याह सद्गुरुः ॥ ११ ॥

देहदेहिभिदा नास्तीत्यपि सुष्ठु प्रदर्शितम् ।

अथ ज्ञानादिगुणत्वं –
तथा आथर्वणिकाः पठन्ति (मु. उ., १.१.९) —

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ॥ इति (क) ॥

तैत्तीयाश्च (तैत्. उ., २.९) —

आनन्दं ब्रह्मणो विद्वान् न विभेति कुतश्चन ॥ इति (ख) ॥

शरण्यत्वसौहार्दाद्यश्च
श्वेताश्वतरैः पठिताः (श्वे. उ., ३.१७) —

सर्वस्य शरणं सुहृद् ॥ इति (ग) ॥

गुणिनो न गुणा भिन्नाः श्रुतिस्मृतिविनिश्चयात् ॥ १२ ॥

तथाहि कठाः पठन्ति (क. उ., २.१.१४) —

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति ॥ इति (क) ॥

श्रुत्यन्तरे च (?) —

ब्रह्मणस्तद्गुणानाञ्च भेददर्श्यधमं तमः ।
भेदाभेदप्रदर्शी तु मध्यमं तु तमो व्रजेद् ॥ इति (ख) ॥

एवमेवाह ब्रह्मा (भाग्. पु., १०.१४.७) —

गुणात्मनस्तेऽपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेऽस्य ॥ इति (ग)

श्रीपराशरश्च —

अनन्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद्धृतभूतसर्गः ॥ इति (घ) ॥

हरेर्देहो गुणाश्चेति भेदोक्तिर्यापि दृश्यते ।
राहुमूर्द्धवदेवासौ मन्तव्या तत्त्ववादिभिः ॥ १३ ॥

एवमाह भगवान् पतञ्जलिः (यो. सू.,) —-

शब्दज्ञानानुपाती वस्तुशून्यो विकल्प ॥ इति (क) ॥

उदाहरति भाष्यकारः —

चैतन्यं ब्रह्मणः स्वरूपम् ॥ इति च (ख) ॥

अथ विभुत्वं
तथाहि कठाः पठन्ति (क. उ., २.१.४) —

महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ इति (ग) ॥

तैत्तिरीयाश्च (तै. उ., ?)

यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ इति (घ) ॥